

# देवव्रत

अयं तु यत्कृते यूयं मया शप्ता स वत्स्यति।
द्यौ स्तदा मानुषे लोके दीर्घकालं स्वकर्मणा॥ 39॥
वेदानाधिजगे सांगान वशिष्ठा देष वीर्यवान् ।
उशना वेद यच्छास्त्रमयं तद् वेद सर्वशः ॥
तथैवांगिरस : पुत्रः सुरासुरनमस्कृत : ।
यद्वेद शास्त्रं तच्चापि कृत्स्नमस्मिन्
प्रतिष्ठितम्। 37/
यदस्त्रं वेद रामस्तदे तस्मिन् प्रतिष्ठितम् ।
महेष्वास्मिमं राजन् राजधर्मार्थ
कोविदम्।38/99।आदिपर्व
"राज्यं तावत पूर्वमेव मयात्यक्तं नराधिपा :।
अपत्य हेतो रपि च करिष्येऽद्य विनि श्च यम्। 95।
अद्य प्रभृति मे दाश ब्रह्मचर्यं भविष्यति।
अपुत्रस्यापि मे लोका भविष्यन्त्यक्षया दिवि॥96।
न ते मृत्यु : प्रभाविता यावज्जीवितु मिच्छसि ।
त्वत्तो ह्यनुज्ञां सम्प्राप्य मृत्यु : प्रभवितानघ ॥103
त्वत्समो नास्ति लोकेऽस्मिन् क्षत्रिय : पृथिवीचर : ।
गम्यतां भीष्म युध्देऽस्मिंस्तोषितोऽहं भृषं त्वया ॥
36॥
परित्यजेयं त्रैलोक्यं राज्यं देवेषु वा पुनः।
यद् वाप्यधिकतमेताभ्यां न तु सत्यं कथंचन॥15॥
न रोचते विग्रहो में पाण्डुपुत्रैः कथंचन ।
यथैव धृतराष्ट्रों मे तथा पाण्डुरसंशयम् ॥ 1/202॥
कीर्तिरक्षणमातिष्ठ कीर्तिर्हि परमं बलम् ।
नष्टकीर्तेर्मनुष्यस्ये जीवितं ह्यफलं स्मृतम् ॥10॥
एष प्रकृतिरव्यक्ता कर्ता चैव सनातन : ।
परश्च सर्वभूतेभ्यस्तस्माद् पूज्यतमोऽच्युत
॥24/38॥



शिव कुमार मिश्र

सर्वास्त्वन्यान् हनिष्यामि पार्थिवान भरतर्षभ ।
यान सेमेष्यामि समरे न तु कुन्तीसुतान नृप ।।21।।

देव व्रतत्वं विज्ञाय पृथिवीं सर्वराजषु ।
नैव हन्यां स्त्रियं जातु न स्त्रीपूर्वं कदाचन ।। 19।।

युध्यस्व निरहंकारो बलवीर्यव्यपाश्रयः
धर्माद्धि युद्धाच्छ्रेयो ऽन्यत क्षत्रियस्य न विद्यते।।37।।

श्रोतु मिच्छसि चेद् धर्मं निखिलेन नराधिप ।
प्रैहि भीष्मं महाबाहो वृद्धं कुरूपितामहम् ।।6/37 शांति पर्व ।।

कृतः पुरूषकारस्तु दैवमेवानुवर्तते।
न दैव मकृते किंचित कस्यचित दातुमर्हति।।22।।

येन प्रीणाति पितरं तेन प्रीतः प्रजापतिः।
प्रीणाति मातरं येन  पृथिवी तेन पूजिता।।25।।

श्रिय एता स्त्रियो नाम सत्कार्या भूतिमिच्छता।
पालिता निग्रहीताष्च श्रीः स्त्री भवति भारत।।15।।

ज्यायांसमपि शीलेन विहीनं नैव पूजयेत।
अपि शूद्रं च धर्मज्ञं सदवृत्तिमभिपूजयेत।।48।।

न हि सत्या दृते किंचित राज्ञां वै सिद्धि कारकम् ।
सत्ये हि राजा निरतः प्रेत्य चेह च नंदति ।।17।।

तस्मान्नैव मृदुर्नित्यम तीक्ष्णोचैव भवेन्नृपः।
बसंतार्क इव श्रीमान न शीतो न च घर्मदः।।40।।

यथाहि गर्भिणी हित्वा स्वं प्रियं मनसोऽनुगम।
गर्भस्य हितमाधत्ते तथा राज्ञाप्यसंषयम।।45।।

सप्तांगस्य च राज्यस्य विपरीतं य आचरित।
गुरूर्वा यदि वा मित्रं प्रतिहन्तव्य एव सः।।8/57।।

लोकरंजनमेवात्र राज्ञां धर्मः सनातनः।
सत्पात्र रक्षणं चैव व्यवहारस्य आर्जवम।।11।।

पुत्रा इव पितुर्गेहे विषये यस्य मानवाः।
निर्भया विचरिस्यन्ति स राजा राजसत्तमः।।33।।

नीति धर्मानुसरणं नित्यमुत्थानमेव च।
रिपूणामनवज्ञानं नित्यं चानार्यवर्जनम्।।12/58।।

आरब्धान्येव कार्याणि सुपर्यवसितानि च।
यस्य राज्ञः प्रदृष्यन्ति स राजा राजसत्तमः।।32/57।।

राज्यं हि सुमहत् तंत्रं धार्यते नाकृतात्मभिः ।
न शक्यं मृदुना वोढुमायासस्थानमुत्तमम्।।21।।

माघोऽयं समनुप्राप्तो मासः सौम्यो युधिष्ठिर।
त्रिभाग शेषः पक्षोऽयं शुक्लो भवितुमर्हति।।28।।

सत्येषु यतितव्यं वः सत्यं हि परमं बलम् ।।49।।

आनृषंस्य परैर्भाव्यं सदैव नियतात्मभिः ।
ब्रह्मण्यैर्धर्मषीलैष्च तपोनित्यैष्च भारताः ।।50।।



अयं तु यत्कृते यूयं मया शप्ता स वत्स्यति।
द्यौ स्तदा मानुषे लोके दीर्घकालं स्वकर्मणा।।३९।।
वेदानाधिजगे सांगान वशिष्ठादेष वीर्यवान् ।
उशना वेद यच्छास्त्रमयं तद् वेद सर्वशः ।।
तथैवांगिरसः पुत्रः सुरासुरनमस्कृतः ।
यद्वेद शास्त्रं तच्चापि कृत्स्नमस्मिन् प्रतिष्ठितम्।३७/
यदस्त्रं वेद रामस्तदे तस्मिन् प्रतिष्ठितम् ।
महेष्वास्मिमं राजन् राजधर्मार्थ कोविदम्।३८/९९ ।आदिपर्व
"राज्यं तावत पूर्वमेव मयात्यक्तं नराधिपाः।
अपत्य हेतो रपि च करिष्येऽद्य विनिश्चयम्। ९५।
अद्य प्रभृति मे दाश ब्रह्मचर्यं भविष्यति।
अपुत्रस्यापि मे लोका भविष्यन्त्यक्षया दिवि।।९६।
न ते मृत्युः प्रभाविता यावज्जीवितु मिच्छसि ।
त्वत्तो ह्यनुज्ञां सम्प्राप्य मृत्युः प्रभवितानघ ।।१०३
त्वत्समो नास्ति लोकेऽस्मिन् क्षत्रियः पृथिवीचरः ।
गम्यतां भीष्म युद्धेऽस्मिंस्तोषितोऽहं भृशं त्वया ।। ३६।।
परित्यजेयं त्रैलोक्यं राज्यं देवेषु वा पुनः।
यद् वाप्यधिकतमेताभ्यां न तु सत्यं कथंचन।।१५।।
न रोचते विग्रहो में पाण्डुपुत्रैः कथंचन ।
यथैव धृतराष्ट्रों मे तथा पाण्डुरसंशयम् ।। १/२०२।।
कीर्तिरक्षणमातिष्ठ कीर्तिर्हि परमं बलम् ।
नष्टकीर्तेर्मनुष्यस्ये जीवितं ह्यफलं स्मृतम् ।।१०।।
एष प्रकृतिरव्यक्ता कर्ता चैव सनातनः ।
परश्च सर्वभूतेभ्यस्तस्माद् पूज्यतमोऽच्युत ।।२४/३८।।